

# परिचयः

चित्रं पठत अवगच्छत च |  ( मम/ भवतः / भवत्याः )

## पुल्लिङ्गः (Masculine)



## स्त्रीलिङ्गः (feminine)




विशेषः –

* भवतः - पुल्लिङ्गे | भवत्याः – स्त्रीलिङ्गे |

* “नाम” इत्यत्र विसर्गः (:) नास्ति | अनुस्वारः (ं) अपि नास्ति |

**एतत् संभाषणम् उच्चैः पठत अवगच्छत च –**

आचार्यः – सर्वेभ्यः स्वागतम् | नमस्काराः | मम नाम अरुणः | भवतः नाम किम् ?

रमेशः – मम नाम रमेशः |

आचार्यः – भवत्याः नाम किम् ?

लता – मम नाम लता |

आचार्यः – मम नाम किम् ?

छात्राः – भवतः नाम अरुणः |

आचार्यः – मम पुस्तकम् | मम मुखम् | मम पादः | एवं सर्वे वदन्तु | पुस्तकम् , चित्रम् , मित्रम् , वृक्षः, हस्तः, लेखनी |

छात्राः – मम पुस्तकम् | मम चित्रम् | मम मित्रम् | मम वृक्षः | मम हस्तः | मम लेखनी |

आचार्यः – भवतः पुस्तकम् | भवतः चित्रम् | एवं क्रमेण वदन्तु |

छात्राः – भवतः मित्रम् | भवतः वृक्षः | भवतः हस्तः | भवतः लेखनी |

आचार्यः – भवत्याः पुस्तकम् | भवत्याः चित्रम् | एवं क्रमेण वदन्तु |

छात्राः – भवत्याः मित्रम् | भवत्याः वृक्षः | भवत्याः हस्तः | भवत्याः लेखनी |